# चिपिटकचर्वणस्य भरतवाक्यस्य वाख्यानम्

कृपया विदुषे कृपार्पणे कमला पङ्कभवाङ्कशोभिनी।

सरसा भवतात् सरस्वतीप्रियसूनुष्वपहाय वैरिताम्॥

महामहोपाध्यायेन पण्डितप्रवरेण श्रीजीवन्यायतीर्थेन विरचिते चिपिटकचर्वणम् इत्याख्ये प्रहसने समुपलभ्यते इदं भरतवाक्यम्।

पुराणप्रसिद्धस्य लक्ष्मीसरस्वत्योः चिरशत्रुतायाः तत्त्वं स्मारयन् पण्डितेषु अपि यथा लक्ष्म्याः कृपावर्षणं भवेत् तदर्थं प्रार्थयन् आह कविः 'कृपया विदुषे कृपार्पणे ---' इति।

विदुषे पण्डिताय कृपार्पणे कृपादाने कृपणा व्यये दाने च कातराः पङ्कभवाङ्कशोभिनी कमलालया कमला लक्ष्मीः सरस्वतीप्रियसूनुषु सरस्वत्याः ईप्सितेषु पुत्रेषु वैरिताम् शत्रुताम् अपहाय परित्यज्य सरसा प्रसन्ना भवतात् भूयात् इति सान्वयप्रतिपादार्थाः।

लक्ष्मीसरस्वत्योः परस्परं वैरं पुराणेषु प्रसिद्धम्। लक्ष्मीः सरस्वती गङ्गा च तिस्रः अपि भगवतः विष्णोः भार्याः। कस्मिंश्चित् प्रसङ्गे सरस्वती लक्ष्म्यां गङ्गायां च ईर्ष्यालुः भूत्वा ते शप्तवती इति देवीभागवतपुराणस्य नवमस्कन्धस्य षष्ठाध्याये वर्णितम्। सरस्वत्याः शापेन लक्ष्मीः तुलसीवृक्षपूपेष गङ्गा च नदीरूपेण मर्त्यम् अवतीर्णे। गङ्गायाः च शापेन सरस्वती अपि नदीरूपतां प्राप्तवती।

इत्थं लक्ष्म्याः सरस्वत्याः च वैरं पुराणप्रसिद्धम्। अतः एवं लोके प्रसिध्यति यत्, यस्मिन् विद्यादात्री भगवती सरस्वती प्रसन्ना भवति न हि तस्मिन् सम्पदः देव्याः भगवत्याः लक्ष्म्याः कृपा वर्षति। यस्मिन् च लक्ष्मीः कृपालुः भवति न हि तस्मिन् भगवती सरस्वती अनुग्रहं करोति। अतएव यः लक्ष्म्याः कृपया सम्पच्छाली भवति न स विद्याम् अधिगच्छति। यश्च विद्यया समृद्धो भवति न स धनिकः भवति।

कविः भरतवाक्ये पुराणादिप्रसिद्धम् एतत् तत्त्वं संस्मारयन् प्रार्थयते यत्, सरस्वत्याः वैरवशात् सरस्वत्याः प्रियेषु पुत्रेषु पण्डितेषु कृपादाने कृपणा देवी लक्ष्मीः सरस्वत्यां वैरं विस्मृत्य विद्वत्सु अकुण्ठितं कृपां वर्षतु।

अत्रेदं वक्तव्यं यत्, भगवत्याः आदिशक्तेः रूपत्रयं पुराणेषु वर्णितम्। महालक्ष्मीः, महासरस्वती, महाकाली च। नान्दीश्लोके देव्याः महाकाल्याः स्तुत्या प्रारब्धं प्रहसनं भरतवाक्ये महालक्ष्म्याः महासरस्वत्याः च स्तवनेन समाप्तिं गच्छेत्। भगवत्याः आदिशक्तेः त्रयाणां रूपाणां प्रार्थनम् अस्मिन् प्रहसने कविना कृतम् इति शम्॥

(<u>भरतवाक्यस्य सरलार्थः</u> – सरस्वत्याः प्रियाः पुत्राः ये पण्डिताः सन्ति तेषु भगवती कमलालया लक्ष्मीः कृपादाने कुण्ठिता भवति। सा कमलालया लक्ष्मीः सरस्वत्या सह स्वस्याः शत्रुतां विस्मृत्य पण्डितेषु प्रसन्ना भूयात्)।